श्री हरि नाममाला स्तोत्रं

श्री हरि नाममाला स्तोत्रं

गोविंदं गोकुलानंदं गोपालं गोपिवल्लभं |
गोवर्धनोद्धरं धीरं तं वंदे गोमतीप्रियं || 1 ||

नारायणं निराकारं नरवीरं नरोत्तमं |
नृसिंहं नागनाथं च तं वंदे नरकांतकं || 2 ||

पीतांबरं पद्मनाभं पद्माक्षं पुरुषोत्तमं |
पवित्रं परमानंदं तं वंदे परमेश्वरं || 3 ||

राघवं रामचंद्रं च रावणारिं रमापतिं |
राजीवलोचनं रामं तं वंदे रघुनंदनं || 4 ||

वामनं विश्वरूपं च वासुदेवं च विठ्ठलं |
विश्वेश्वरं विभुं व्यासं तं वंदे वेदवल्लभं || 5 ||

दामोदरं दिव्यसिंहं दयाळुं दीननायकं |
दैत्यारिं देवदेवेशं तं वंदे देवकीसुतं || 6 ||

मुरारिं माधवं मत्स्यं मुकुंदं मुष्टिमर्दनं |
मुंजकेशं महाबाहुं तं वंदे मधुसूदनं || 7 ||

केशवं कमलाकांतं कामेशं कौस्तुभप्रियं |
कौमोदकीधरं कृष्णं तं वंदे कौरवांतकं || 8 ||

भूधरं भुवनानंदं भूतेशं भूतनायकं |
भावनैकं भुजंगेशं तं वंदे भवनाशनं || 9 ||

जनार्दनं जगन्नाथं जगज्जाड्यविनाशकं |
जामदग्न्यं परं ज्योतिस्तं वंदे जलशायिनं || 10 ||

चतुर्भुजं चिदानंदं मल्लचाणूरमर्दनं |
चराचरगुरुं देवं तं वंदे चक्रपाणिनं || 11 ||

श्रियःकरं श्रियोनाथं श्रीधरं श्रीवरप्रदं |
श्रीवत्सलधरं सौम्यं तं वंदे श्रीसुरेश्वरं || 12 ||

योगीश्वरं यज्ञपतिं यशोदानंददायकं |
यमुनाजलकल्लोलं तं वंदे यदुनायकं || 13 ||

सालग्रामशिलाशुद्धं शंखचक्रोपशोभितं |
सुरासुरैः सदा सेव्यं तं वंदे साधुवल्लभं || 14 ||

त्रिविक्रमं तपोमूर्तिं त्रिविधाघौघनाशनं |
त्रिस्थलं तीर्थराजेंद्रं तं वंदे तुलसीप्रियं || 15 ||

अनंतमादिपुरुषमच्युतं च वरप्रदं |
आनंदं च सदानंदं तं वंदे चाघनाशनं || 16 ||

लीलया धृतभूभारं लोकसत्त्वैकवंदितं |
लोकेश्वरं च श्रीकांतं तं वंदे लक्ष्मणप्रियं || 17 ||

हरिं च हरिणाक्षं च हरिनाथं हरप्रियं |
हलायुधसहायं च तं वंदे हनुमत्प्रियं || 18 ||

हरिनामकृता माला पवित्रा पापनाशिनी |
बलिराजेंद्रेण चोक्ता कंठे धार्या प्रयत्नतः ||

इति बलिराजेंद्रेणोक्तं श्री हरि नाममाला स्तोत्रं |